A First EPQRST Journal-www.jahnavisanskritejournal.com, Issue-17th, Vol.-V, 14.1.14
ISSN 976-8645

# उपनिषत्सु जीवनदर्शनम्

सच्चिदानन्दस्नेही

कूटशब्दाः वेदान्त, उपनिषद्, पुरुषार्थचतुष्टय, भारतीयजीवनदर्शन।

वेदान्ता उपनिषद इत्याख्यान्ते। यद्यपि शताधिकाः उपनिषद्ग्रन्थाः वर्तन्ते तेषु दश अतीव महत्त्वपूर्णा सन्ति। उपनिषदो भारतीयजीवनदर्शनस्य ज्वलन्ति रत्नानि। महर्षिभिः यानि आध्यात्मिक-तत्त्वानि जीवनदर्शनं च ज्ञानदृशा साक्षदकुर्वन् तानि सर्वाणि तत्त्वानि अत्र वर्णितानि। एतदुद्भूता नानानिर्झरिण्यो नानाशास्त्र-धर्मशास्त्र-आचारशास्त्र-नीतिशास्त्रादि-रूपेण सकललमपि भुवनं भगीरथीप्रवाह इव पावयन्ति। उपनिषत्सु जीवनदर्शनस्य मूलमस्ति-विनश्वरे जगति एकं सत् अविनश्वरं च वस्तु ब्रह्मैव, तदेव जीवने अन्वेषितव्यम्। भगवद्गीतायां मुख्यतः प्रतिपादितस्य निष्कामकर्मयोगस्य ईशोपनिषदि प्राप्यते-

कुर्वन्नेवेह कर्माणि, जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति, कर्म लिप्यते नरे।।

जीवनोपदेशः कठोपनिषदि उक्तम् उद्बोधनरुपेण-

उत्तिष्टत जाग्रत प्राप्य वरान्निबोधत।

अयं शान्तिपाठः अस्माकं जीवनदर्शनस्य मूलमन्त्रं विद्यते। तदुक्तम् कठोपनिषदि-

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं
करवावहै। तेजस्वि नावधीतमस्तु
मा विद्विषावहै।।
शान्तिः! शान्तिः!! शान्तिः!!!

एवं उपनिषत्सु विवेचनगाम्भीर्येण, आलोचनाचातुर्येण, गुढार्थनिरीक्षणेन, संवेदन-शीलानुभतिप्रकर्षेण, सत्यान्वेषणानुरागित्वेन, तत्त्वार्थग्रहप्रवणेक्षणेन, पुरुषार्थचतुष्टयसाधकत्वेन, जीवनोन्नायकत्वेन दुःखत्रयविनाशपूर्वक-ब्रह्मसाक्षात्कारकरणत्वेन

ISSN 976-8645

*सेमाषामपि सुधियां समादृतिं समधिगच्छति।*

**येनेरिताः प्रवर्तन्ते प्राणिनः स्वेषु कर्मसु।**
**तं वन्दे परमात्मानं स्वात्मानं सर्वदेहिनाम्।।**
**यस्य पादांशुसम्भूतं विश्वं भाति चराचरम्।**
**पूर्णानन्दं गुरुं वन्दे तं पूर्णानन्दविग्रहम्।।**[1]

वेदान्ता उपनिषद इत्याख्यायन्ते। तथा च उपनिषत्–शब्दस्तु वेदान्तशब्देन पराविद्याशब्देन वा अभिधीयते। वेदान्तसारकारः सदानन्दः आह–**वेदान्तो नाम उपनिषत्प्रमाणम्**[2] **।** उपनिषद् एव प्रमाणम् उपनिषद् प्रमाणम्। उपनिषदो यत्र प्रमाणमिति वा। उपनिषच्छब्दस्य रहस्यमर्थः, आध्यात्मविद्यारहस्यस्य प्रतिपादकावेदभागा उपनिषदः कथ्यन्ते। उप–नि–उपसर्गपूर्वकात् विशरणगत्यवसादनार्थकात् षद्लृ सद् धातोः क्विपि उपनिषच्छाब्दो निष्पद्यते। उपनिषच्छब्दस्य अर्थसामान्यं निरूपयन् आचार्यशङ्करः प्राह– **उपशब्दो हि सामीप्यमाह। निशब्दश्च निश्चयार्थः। तस्मादैकात्म्यं निश्चितिम्। सा विद्या सहेतुं संसारं सादयतीत्युपनिषदुच्यते**[3] **।**

यद्यपि शताधिकाः उपनिषद्ग्रन्थाः वर्तन्ते तथापि उपनिषदां विषये दशसंख्या अतीव महत्त्वपूर्णा अस्ति, यथोक्तम्–

**ईश–केन–कठ–प्रश्न–मुण्ड–माण्डूक्य–तित्तिरः।**
**ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश।।**[4]

श्वेताश्वतरोपनिषदेकादश्यपि प्रसिद्धा। मुक्तिकोपनिषदि उपनिषदां संख्या 108 कथिता। तत्र 10 उपनिषदः ऋग्वेदसम्बद्धाः, 19 उपनिषदः शुक्लयजुर्वेदसम्बद्धाः, 32 उपनिषदः कृष्णयजुर्वेदसम्बद्धाः, 16 सामवेदसम्बद्धाः, 31 अथर्ववेदसम्बद्धाः सन्ति। कतिचनोपनिषदो गद्यात्मिकाः, कतिचन पद्यात्मिकाः कतिचन गद्यपद्योभयात्मिकाश्च। उपनिषदां रचनाकालो भिन्नभिन्नः, परं प्रसिद्धा कतिचनोपनिषदो बुद्धकालात्प्राचीनाः एवेति अत्र नास्ति कश्चित् सन्देहः।

उपनिषदो भारतीयजीवनदर्शनस्य ज्वलन्ति रत्नानि। महर्षिभिः यानि आध्यात्मिकतत्त्वानि जीवनदर्शनं च ज्ञानदृशा साक्षात्कृतं तानि सर्वाणि तत्त्वानि अत्र वर्णितानि। उपनिषदो सरससरलशैल्या तत्त्वं बोधयन्ति। अतः तासां महत्त्वं लोकप्रियत्वं चानुदिनमवर्धत। आसां तत्त्वप्रकाशनशैली जीवनदर्शनं च यथा–

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।**
**इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।**

A First EPQRST Journal-www.jahnavisanskritejournal.com, Issue-17th, Vol.-V, 14.1.14

ISSN 976-8645

**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।।**[5]

उपनिषदो हि जीवनदर्शनस्य स्रोतः वर्तते। एतदुद्भूता नानानिर्झरिण्यो नानाशास्त्र–धर्मशास्त्र–आचारशास्त्र–नीतिशास्त्रादि–रूपेण सकलमपि भुवनं भगीरथीप्रवाह इव पावयन्ति। प्रस्थानयाम् उपनिषद एव परमप्रमाणत्वेन संग्राह्यः यतो हि प्रस्थानयामन्यद् द्वयं ग्रन्थरत्नं गीता ब्रह्मसूत्रं चेति द्वयमपि उपनिषदाश्रयमेव। उपनिषत्सु भारतीयजीवनदर्शनस्य प्रायशः सकलो अपि संग्रह समुपस्थाप्यते। उपनिषत्सु भारतीयजीवनदर्शनस्य मुख्यत्वेन वर्णिता विषयाः समासतः सन्ति–कोऽहमस्मि ? अहं कुत आगतोऽस्मि ? कुत्र अहं गमिष्यामि ? किं ब्रह्म, क ईश्वरः, जीवात्मनः किं स्वरूपं, किं तस्य लक्ष्यम्, सृष्टेः मूलरूपं किम् कथं जगतः प्रादुर्भावः, कथं जगतः प्रलयः, आध्यात्मज्ञानस्य आवश्यकता, आध्यात्मेन किं साध्यते, आध्यात्मेन च कथं मोक्षावाप्तिः, कानि च मोक्षासाधनानि, ब्रह्मणो भिन्नोंऽभिन्नो वा कथं च भिन्नत्वम् अभिन्नत्वं वा, ज्ञानमार्गेण किं साध्यते, ब्रह्मासाक्षात्कारस्य के लाभाः इत्यादयः। उपनिषत्सु जीवनदर्शनस्य मूलमस्ति–विनश्वरे जगति एकं सत् अविनश्वरं च वस्तु ब्रह्मैव, तदेव जीवने अन्वेषितव्यम्। जीवने अस्मिन् यदि ब्रह्मज्ञानं न स्यात् तर्हि जीवनं निष्फलमेव स्यात्। तत्त्वज्ञानेन ब्रह्मदर्शनेन च जीवो मुक्तिं लभते। जीवनदर्शनस्य मूलमुक्तम् ईशावास्योपनिषदे–

**ॐ ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।।**[6]

एवं कठोपनिषदि वित्तलिप्सा विषये प्राह–न वित्तेन तर्पणीयो मनुष्योः।। अतः वित्तस्य लोभं त्यक्त्वा ज्ञानं प्रति गच्छ यतो हि तत्र ज्ञानकर्ममार्गयोः समन्वयेनैव सुखसाधनत्वं सिध्यति–**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।** भगवद्गीतायां मुख्यतः प्रतिपादितस्य निष्कामकर्मयोगस्य ईशोपनिषदि प्राप्यते–

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**
**एवं त्वयि नान्यथेतोऽस्ति कर्म लिप्यते नरे।।**[7]

विश्वबन्धुत्वस्योपदेश ईशोपनिषदि लभ्यते–

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।**[8]

जीवनोपदेशः कठोपनिषदि उक्तम् उद्बोधनरूपेण–

**उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।**
**क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति।।**[9]

उपनिषत्सु वेदानां सारभागः सरलयाऽभिव्यक्त्या प्रश्नोत्तररूपेण आख्यायिकासमनवयेन च

ISSN 976-8645

चिरां शैलीम् आश्रित्य प्रतिपाद्यते। उपनिषद एता जीवने शान्ति प्रदायिका:, आधिव्याधिनिरोधिका: मनस: शान्तिदा:, आत्मनश्च प्रसादिका:, अविद्यान्धतमसविनाशात् ज्ञानप्रभाप्रसारिका: सर्वशास्त्रमूर्धन्यत्वेन समादृताश्च सन्तीति एतासां महत्त्वम् अक्षुण्णं निर्विवादं च। उपनिषत्सु एव शान्तिसन्देश: प्राप्यते। अयं शान्तिपाठ: अस्माकं जीवनदर्शनस्य मूलमन्त्रं विद्यते। तदुक्तम् कठोपनिषदि–

**ॐ सह नाववतु। सह नौ भुनक्तु।**
**सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु**
**मा विद्विषावहै।।**[10]
**ॐ शान्ति: शान्ति:!! शान्ति:!!!**

वस्तुत: ब्रह्मसाक्षात्कार एव उपनिषदां चरमं लक्ष्यम्। ब्रह्मसाक्षात्कारेणैव सर्वपापनिरोधो मोक्षावाप्तिश्च। तद् व्यतिरिक्तं सर्वं नश्वरम् अपूर्णं च। अत: जीवनदर्शनस्य लक्ष्यमस्ति पूर्णत्वस्य प्राप्तिर्मोक्षो वा। उक्तमपि ईशावास्योपनिषदि–

**ॐ पूर्णमद: पूर्णमिदं पूर्णात्पूर्णमुदच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**[11]
**ॐ शान्ति! शान्ति!! शान्ति!!!**

सारांशत: जीवनदर्शनस्य सन्दर्भे उपनिषदां वैशिष्ट्यं अधोलिखितकारणेभ्य: वर्तते–

1. आध्यात्मप्राध्यान्यत्वात्।
2. धर्मपोषकत्वात्।
3. वेदप्रामाण्यात्।
4. दु:खविनाशकत्वात्।
5. कर्मफलस्यानिवार्यत्वात्।
6. मानवजीवनान्वययित्वात्।
7. पुनर्जन्मस्य स्वीकार्यत्वात्।
8. चारित्रिकोन्नतेर्मार्गदर्शनत्वात्।
9. मोक्षस्यजीवनलक्ष्योपदेशात्।
10. विचारस्वातन्त्रत्वात्।
11. व्यापकम् ईक्षणत्वात्।
12. अनुभूतिमूलकत्वात्।
13. विवेचनप्राधान्यात्।
14. समाजोत्थापनभावनाप्राधान्यात्।
15. सर्वतत्त्वसमन्वायाच्च।

जीवनदर्शनस्य प्रतिबिम्बस्वरूपं वैदिकदीक्षान्तोपदेशस्तूक्तं कृष्णयजुर्वेदीय–तैत्तिरीयोपनिषदि–तदित्थं–वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति।

सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमद:। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सी:। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।

ISSN 976-8645

देवपितृकार्याभ्यां न प्रमदितव्यम्।

मातृदेवो भव! पितृदेवो भव! आचार्यदेवो भव! अतिथिदेवो भव! यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि। तानि त्वयोपास्यानि। नो इतराणि।

ये के चास्मच्छ्रेयांसो ब्राह्मणाः। तेषां त्वया आसनेन प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धया देयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्।

अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्। ये तत्र ब्राह्मणाः सम्मर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः।

अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः सम्मर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः।

एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतद् अनुशासनम्। एवमुपासितव्यम्। एवम् चैतदुपास्यम्।[12]

अस्मिन् लोके सम्प्रति जनाः केवलं भौतिकवादमवलम्ब्य अधिकाधिकधनपरिग्रहार्थं प्रवर्तन्ते। अस्ति धनस्य महात्म्यं जीवने नास्ति अत्र कश्चित् संशयः, परं च उपनिषत्सु यज्जीवनदर्शनं तत् तु धनस्य आध्यात्मिकज्ञानं प्रति न्यूनतां साधयति। यथोक्तं बृहदारण्यकोपनिषदः मैत्रेयी–याज्ञवल्क्यसंवादे–

याज्ञवल्क्य नाम ऋषिः हे मैत्रेयि इति स्वभार्यां सम्बोध्य उवाच। किम् उवाच ? अरे मैत्रेयि! अस्मात् गार्हस्थ्यात् स्थानात् आश्रमात् उद्यास्यन् वा ऊर्ध्व पारिव्रज्याख्यमाश्रमान्तरं यास्यन्नेवाहमस्मि भवामि। अतः ते अनुमतिं प्रार्थयामि इत्यर्थः। किं च ते तवानया द्वितीयया भार्यया कात्यायन्या सह अन्तं विच्छेदं करवाणि। द्रव्यविभागेन विभक्तां कृत्वा गमिष्यामि इत्यर्थः।

मैत्रेयी उवाच भगो भगवन्! यन्नु मे इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात् कथं तेनामृता स्यामिति, नेति होवाच यज्ञवल्क्यो यथैवोपकरणवत्तां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाऽऽशास्ति वित्तेनेति।

सा होवाच मैत्रेयी येनाहं नाऽमृता स्यां किमहं तेन कुर्याम् ? यदेव भगवान्नेव तदेव मे ब्रूहीति। स उवाच–**अरे! मैत्रेयि! आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्।**[13]

अतः पुरुषार्थचतुष्टयेषु धर्मार्थकाममोक्षेषु सर्वेषु सामञ्जस्येन प्रवृत्तिर्भवितव्या यतो हि तया प्रवृत्या एव निःश्रेयस्यस्य प्राप्ति उपनिषत्सु उक्ता। न तु केवलेन धनेन। तदुक्तं मुण्डकोपनिषदि–

**भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**

**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।।**[14]

उपनिषत्सु समाजस्य संस्कृतेश्च समुत्थापनस्य महती कामना दृश्यते। तेषु उपनिषत्सु समन्वयभावना प्रमुखा वर्तते। तत्र विविधानां विचाराणां समन्वयश्चावलोक्यते।

एवं उपनिषत्सु विवेचनगाम्भीर्येण, आलोचनचातुर्येण, गूढार्थनिरीक्षणेन, संवेदन-शीलानुभूतिप्रकर्षेण, सत्यान्वेषणानुरागित्वेन, तत्त्वार्थग्रहप्रवणेक्षणेन, समन्वयभवनया, मनः स्थित्यनुशीलनेन, अतीतानुरागित्वेन, आध्यात्माभिमुख्येन, पुरुषार्थचतुष्टयसाधकत्वेन, जीवनोन्नायकत्वेन, दुःखत्रयविनाशपूर्वक-ब्रह्मसाक्षात्कारकरणत्वेन सेमाषामपि सुधियां समादृतिं समधिगच्छति।

## अन्तटिप्पणी


1. केनोपषिद्भागात्, मन्त्र सं. 1, ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थहिन्दीव्याख्योपेता, गीताप्रेसगोरखपुरतः।
2. वेदान्तसारः, आचार्यसदानन्दप्रणीतः।
3. शाङ्करभाष्यं, ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थहिन्दीव्याख्योपेता, गीताप्रेस गोरखपुरतः।
4. संस्कृतसाहित्येतिहासः, पु. सं. 12, उपनिषद्परिचयः, आचार्यरामचन्द्रमिश्र, चौखम्बाविद्याभवनवाराणसी, सं. 1998।
5. कठोपनिषद्तः, ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थहिन्दीव्याख्योपेता, गीताप्रेस गोरखपुरतः।
6. ईशावास्योपनिषद्तः, मन्त्र सं. 1, ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थहिन्दीव्याख्योपेता, गीताप्रेस गोरखपुरतः।
7. ईशावास्योपनिषद्तः, मन्त्र सं. 2, ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थहिन्दीव्याख्योपेता, गीताप्रेस गोरखपुरतः।
8. ईशावास्योपनिषद्तः, मन्त्र सं. 6, ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थहिन्दीव्याख्योपेता, गीताप्रेस गोरखपुरतः।
9. कठोपनिषद्तः, मन्त्र सं. 14, ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थहिन्दीव्याख्योपेता, गीताप्रेस गोरखपुरतः।
10. कठोपनिषद्तः, मन्त्र सं. 19, ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थहिन्दीव्याख्योपेता, गीताप्रेस गोरखपुरतः।

ISSN 976-8645

11. ईशावास्योपनिषद्तः शान्तिपाठात्, मन्त्र सं. 1, ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थहिन्दीव्याख्योपेता, गीताप्रेस गोरखपुरतः।
12. ईशावास्योपनिषद्तः, शान्तिपाठात् ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थहिन्दीव्याख्योपेता, गीताप्रेस गोरखपुरतः।
13. बृहदारण्यकोपनिषदः, मैत्रेयी–याज्ञवल्क्यसंवादात्, वैदिकसूक्तसंग्रहः, हिन्दीव्याख्योपेता, गीताप्रेस गोरखपुरतः।
14. मुण्डकोपनिषत्, 2–2–8।

## सन्दर्भग्रन्थसूची


1. ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थहिन्दीव्याख्योपेता, गीताप्रेसगोरखपुरतः संस्करणं संवत् 2064।
2. वेदान्तसारतः। परिमलपब्लिकेशन्स, शक्तिनगरदिल्लीतः। संस्करणं ई. सं. 2003।
3. ईशादि नौ उपनिषदतः, शाङ्करभाष्यं, शाङ्करभाष्यार्थहिन्दीव्याख्योपेता, गीताप्रेसगोरखपुरतः। संस्करण संवत् 2064।
4. संस्कृतसाहित्येतिहासः, पु. सं. 12, उपनिषद्परिचयः, आचार्यरामचन्द्रमिश्र, चौखम्बाविद्याभवनवाराणसी, सं. 1998।
5. ईशादि नौ उपनिषद्तः, शाङ्करभाष्यार्थहिन्दीव्याख्योपेता, गीताप्रेसगोरखपुरतः। संस्करण संवत् 2064।
6. वैदिकसूक्तसंग्रहतः, कृष्णयजुर्वेदीयतैत्तिरीयोपनिषद्स्य शिक्षावल्यामेकादशोऽनुवाकः, हिन्दीव्याख्योपेता, गीताप्रेस गोरखपुरतः। संस्करणं संवत् 2068।
7. वैदिकसूक्तसंग्रहतः, बृहदारण्यकोपनिषद्स्य, मैत्रेयीयाज्ञवल्क्यसंवादात्, हिन्दीव्याख्योपेता, गीताप्रेसगोरखपुरतः। संस्करण संवत् 2068।
8. ईशादि नौ उपनिषद्तः, मुण्डकोपनिषदस्य, मन्त्र सं. 08, शाङ्करभाष्यार्थहिन्दीव्याख्योपेता, गीताप्रेसगोरखपुरतः। संस्करणं संवत् 2068।